# संस्कृतवार्ता:

दिनाङ्क :- 12/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वीय द्विदिवसीया-धिकारिकयात्रायाः अन्तर्गतं मारिशस्-देशस्य प्रधानमन्त्रिणा नवीन-रामगुलामेन सह प्रतिनिधिस्तरीय-वार्ता कृता; अस्मिन् अवधौ भारत-मारीशस्-देशयोः मध्ये अष्ट-सन्धि-ज्ञापनपत्रेषु हस्ताक्षराणि जातानि।
- राष्ट्रपति: द्रौपदी मुर्मु: पञ्जाब-विश्वविद्यालयस्य द्विसप्ततितमस्य दीक्षान्त-समारोहं सम्बोधितवती; सहैव देशस्य समावेशि-स्थायिविकासाय समाजस्य वञ्चित-वर्गाणाम् उत्थानाय च बलं प्रदत्तवती।
- पाकिस्तानदेशे, बलूच-लिबरेशन्-आर्मी इत्यस्य आतङ्किभिः रेलयानस्य अपहरणात् परं सुरक्षासैनिकाः पञ्चाशदधिकैक-शततः अधिकान् बन्धकान् रक्षितवन्तः।
- जम्मू-कश्मीरे पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य खेलोइण्डिया-शीतकालीनक्रीडायाः द्वितीयचरणस्य अद्य समापनं भविष्यति।

---

प्रधानमन्त्री-मारिशस्

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य मॉरीशस्-देशस्य चैम्प-डी-मार्स् इत्यत्र आयोजिते मारीशस्-देशस्य राष्ट्रियदिवसस्य समारोहे मुख्यातिथिरूपेण भागं गृहीतवान्। समारोहावधौ, मॉरिशस्-देशस्य राष्ट्रपतिः धरमबीर-गोखुलः भारत-मॉरिशस्-सहभागितायां श्रीमोदिनः उत्कृष्ट-

योगदानाय तस्मै ग्रैण्ड-कमाण्डर्-आफ़्-द-आर्डर्-आफ़्-द-स्टार् तथा च की-आफ़्-द-इण्डियन्-ओशन् इत्येताभ्याम् उपाधिभ्यां सम्मानितवान्। प्रधानमन्त्री मोदी प्रथमः भारतीयः अस्ति, यः मॉरिशस्-देशस्य सर्वोच्चं नागरिकपुरस्कारं प्राप्तवान्। मॉरिशस्-देशस्य राष्ट्रिय-दिवसोत्सवस्य पथसञ्चलने भारतीय-नौसेनायाः दलमेकमपि भागम् अगृह्णात्।

प्रधानमन्त्रिणा नरेन्द्रमोदिना स्वीय द्विदिवसीया-धिकारिकयात्रायाः अन्तर्गतं मारिशस्-देशस्य प्रधानमन्त्रिणा नवीन-रामगुलामेन सह प्रतिनिधिस्तरीय-वार्ता कृता। यात्रायाः द्वितीये दिवसे भारत-मारीशस्-देशयोः मध्ये अनेकेषु सन्धिपत्रेषु हस्ताक्षराणि कृतानि। उपवेशनावधौ स्थानीय-मुद्रा-समाधान-व्यवस्था, ऋण-सौविध्य-सन्धयः, राजनयिकेभ्यः प्रशिक्षण-कार्यक्रमः, श्वेत-नौवहन-सूचना-आदानप्रदानम्, वित्तीयापराधानां प्रतिरोधः, सूक्ष्मलघु-मध्यमोद्योग-क्षेत्रे सहयोगः, सुशासनार्थं सार्वजनिका-धिकारिणां प्रशिक्षणम् इत्यादिषु सम्बद्धविषयेषु अष्ट Mou इति सन्धि-ज्ञापन-पत्राणां तथा च सन्धीनां आदानप्रदानं सञ्जातम्। एकस्मिन् संयुक्त-वार्ताहर-सम्मेलने स्वीय वक्तव्ये, प्रधानमन्त्री भारतस्य क्षेत्रीय-कार्यनीतौ मारिशस्-देशस्य महत्त्वं प्रकाशितवान्, यस्मिन् वैश्विक-दक्षिणक्षेत्रे, हिन्दमहासागरे, अफ्रीका-महाद्वीपे च मॉरिशस्-देशस्य महत्त्वपूर्ण-भूमिकायै बलं प्रदत्तवान्। अस्मिन् अवसरे, असौ क्षेत्रीयस्थिरतां समृद्धिं च प्रति भारतस्य प्रतिबद्धतायाः विषये अवदत्। सः अवदत् यत् उभौ देशौ न केवलं हिन्दमहासागरेण अपितु परम्परया संस्कृत्या च सम्बद्धौ स्तः।

एकस्य नूतनोपक्रमस्य अनावरणं कुर्वन्, श्रीमोदी अघोषयत् यत्, "वैश्विक-दक्षिणाय अस्माकं दृष्टिः भविष्यति महासागरसुरक्षा, तथा च सर्वेषु क्षेत्रेषु विकासाय परस्पर-समग्र-प्रगतिः"। अस्य अन्तर्गतं विकासाय व्यापारः, सततविकासाय क्षमता-निर्माणम्, सहभागि-भविष्याय परस्पर-सुरक्षा: च सम्मिलिताः भविष्यन्ति। घोषणैषा मॉरिशस्-देशेन सह भारतस्य दीर्घकालीन-सम्बन्धाय, क्षेत्रीयसहयोगाय विकासाय च व्यापकदृष्टेः पुष्टिं करोति।

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य अवदत् यत् भारत-मारिशस्-देशाभ्यां स्वसहभागित्वम् उन्नत-रणनीतिक-सहभागि-स्तरं प्रति वर्धयितुं निर्णयः कृतः। सामाजिक-सञ्चार-पटले एकस्मिन् सन्देशे प्रधानमन्त्रिणा कथितं यत् मॉरिशस्-देशस्य राष्ट्रिय-दिवसस्य विशेषावसरे मॉरिशस्-देशस्य स्वीय समकक्षीयेन नवीनचन्द्र-रामगुलामेन सह मेलनस्य अवसरः प्राप्तः। श्रीमोदी अवदत् यत्

उपवेशने उभयपक्षाभ्यां भारत-मॉरिशस्-सम्बन्धानां सम्पूर्णविषयेषु चर्चा जाता। असौ अवदत् यत् आधारभूत-संरचना, आवासः, आङ्किककीय-प्रौद्योगिकी, स्वास्थ्यम् च इत्यादिषु क्षेत्रेषु सहयोगस्य मार्गाणाम् अन्वेषणं जातम्। मॉरिशस्-देशस्य सर्वोच्चं राष्ट्रियपुरस्कारं प्राप्ते सति प्रधानमन्त्री आभारं प्रकटितवान्। असौ एनं पुरस्कारं भारतस्य चत्वारिंशदधिकैकशत-कोटिजनानां कृते, उभयदेशयोः मध्ये युगानुयुगे मैत्रीं प्रति च समर्पितवान्।

---------------------------------------------

प्रधानमन्त्री-दाण्डी मार्च

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य ऐतिहासिक-दण्डीमार्च इत्यस्मिन् भागं गृहीतेभ्यः सर्वेभ्यः महाजनेभ्यः श्रद्धाञ्जलिः समर्पिता। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे श्रीमोदी अवदत् यत् महात्मगान्धिनः नेतृत्वे यात्रया आत्मनिर्भरतायाः स्वातन्त्र्यस्य च कृते राष्ट्रव्यापि-आन्दोलनस्य अग्निः प्रज्वलितम्। प्रधानमन्त्रिणा उक्तं यत् दाण्डी-यात्रान्दोलने भागं गृहीतानां सर्वेषां साहस-त्यागयोः, सत्याहिंसयोः च प्रतिबद्धता जनान् निरन्तरं प्रेरयन्ति।

---------------------------------------------

राष्ट्रपति-पञ्जाब-भ्रमण

राष्ट्रपतिपदासीनया द्रौपदी मुर्मु वर्यया अद्य देशस्य समावेशि-स्थायिविकासाय समाजस्य वञ्चित-वर्गाणाम् उत्थानाय च बलं प्रदत्तवती। चण्डीगढस्य पञ्जाब-विश्वविद्यालयस्य द्विसप्ततितमस्य दीक्षान्त-समारोहस्य अध्यक्षा द्रौपदी मुर्मूः अवदत् यत् छात्रेषु संवेदनशीलता राष्ट्रप्रेमभावना च भवितुमर्हति। छात्राणां अभिनन्दनं कृत्वा सा प्रोक्तवती यत् छात्राः सकारात्मक-मानसिकतां धारयन्तु, उदयमान-प्रौद्योगिकीभिः परिचिताः भवेयुः, येन भविष्ये समाह्वानान् सम्मुखीकर्तुं सज्जाः भवन्तु। सा विश्वविद्यालयस्य उपलब्धीनां प्रशंसाम् अकरोत्।

---------------------------------------------

पाटिल-गङ्गा संरक्षण सभा

केन्द्रीय-जलशक्ति-मन्त्री सी.आर्.पाटिलः अद्य एकीकृत-प्रौद्योगिकी-चालित-दृष्टेः माध्यमेन गङ्गानदीं स्वच्छतरम्, अधिकस्थायिं च कर्तुं प्रशासनस्य प्रतिबद्धतायाः पुष्टिं कृतवान्। नवदिल्ल्यां गङ्गासंरक्षणविषये सशक्त-कार्यदलस्य चतुर्दशोपवेशनस्य अध्यक्षतां कुर्वन् श्रीपाटिलः परियोजनानां समयबद्ध-निष्पादनस्य, सुदृढप्रदूषण-नियन्त्रणोपायानाम्, अन्तामन्त्रालय-समन्वयस्य च सम्वर्धनाय आवश्यकतायै बलं दत्तवान्। अस्मिन् सत्रे विभिन्न-मन्त्रालयानां राज्यप्रशासनानां च प्रमुखाः हितधारकाः एकत्रिताः आसन्। केन्द्रीयजलशक्ति राज्यमन्त्रिणा राजभूषणचौधरी इत्यनेनापि सम्मेलने भागः गृहीतः।

-------------------------------------------

दिल्ली-अवैध बाङ्गलादेशी

दिल्ल्यारक्षि-बलम् अवैध-बाङ्गलादेशीय-प्रवासीनां विरुद्धम् अभियानम् प्रचालयति। दक्षिणपूर्व-दिल्ल्यां दक्षिणदिल्ल्यां च एकस्याभियानस्यावधौ आरक्षिबलेन अवैधरूपेण देशे प्रविष्टाः द्वादशतोप्यधिकाः बाङ्गलादेशीय-नागरिकाः निगडिताः।

-------------------------------------------

पाकिस्तान

पाकिस्तानदेशे, बलूच-लिबरेशन्-आर्मी इत्यस्य आतङ्किभिः बलूचिस्तानस्य कच्छीजनपदे चतुःशततोप्यधिकान् यात्रिणः वहन्तीं रेलयानस्य अपहरणादनन्तरं सुरक्षासैनिकाः पञ्चाशदधिकैक-शततोप्यधिकान् बन्धकान् रक्षितवन्तः। सुरक्षाभियाने साम्प्रतं यावत्, जाफर्-एक्स्प्रेस्-रेलयानस्य अपहरणे संलग्नाः सप्तविंशतिः आतङ्कवादिनः मृत्युमुपगताः। आतङ्किभिः सह सङ्घर्षस्य अनन्तरं सुरक्षासैनिकाः बन्धकान् रक्षयितुं समर्थाः जाताः। उद्धारकार्याणि प्रचलन्ति, प्रतिवेदनानि सूचयन्ति यत् आत्मघाति-विस्फोटकाः केचन बन्धकान् गृहीतवन्तः।

-------------------------------------------

भारतऋतुविज्ञानविभाग

भारतऋतुविज्ञानविभागेन अद्य पश्चिमराजस्थान-गुजरातयोः विभिन्नेषु स्थानेषु ताप-तरङ्गस्य पूर्वानुमानं प्रकटितम्। ऋतुविज्ञानविभागेन उक्तं यत् अद्य कोङ्कण-गोवा-तटीयकर्नाटकेषु उष्ण-आर्द्र-वायोः प्रवाहस्य सम्भावना विद्यते। आकाशवाण्या सह विशिष्टचर्चायां ऋतुविभागस्य वरिष्ठवैज्ञानिकः डॉ. सोमा सेन रायः अवदत् यत् जम्मू-कश्मीरे हिमाचलप्रदेशस्य पश्चिमभागे च अद्य विद्युद्द्योतनादि क्रियाकलापानाम् आरम्भस्य सम्भावना वर्तते।

---

<u>खेलो इण्डिया</u>

बारामुला-जनपदस्य गुलमर्गे पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य खेलोइण्डिया-शीतकालीनक्रीडायाः द्वितीयचरणस्य अद्य समापनम् भविष्यति। क्रीडायाः प्रथमं चरणं लद्दाखनगरे जनवरीमासस्य त्रयोविंशति-दिनाङ्कादारभ्य सप्तविंशति-दिनाङ्क पर्यन्तं सफलतया आयोजितम्।

।। इति वार्ता:।।